संस्कृत

क्र.नं. ९८३

तंत्र (ना.)

सप्तशती

स्तोत्र

६१८ श्लो.

२९२

(पृ. ४ ते ५०. त्रुटीत)

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्वरीतथा ॥ कट्यो भगवतीरक्षेन्नितंबं विंध्यवासि
नी ॥ २८ ॥ स्थूलश्रौने श्रौनाथा तथा मे ऊरू मरूसे मेघ
वाहिनी ॥ जंघे महाबला प्रोक्ता जानुनी शैलधारि
णी ॥ २९ ॥ गुल्फयो नारसिंही च पादपृष्ठे मितौज
सी ॥ पादांगुलीः श्रीधरी च तलं पातालवासिनी ॥
॥ ३० ॥ दंष्ट्राः कराली नीरक्षेत्केशांश्चैवोर्ध्वकेशि
नी ॥ रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥ ३१ ॥
रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ॥ अं
त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥ ३२ ॥ पद्मा
वतीपद्मकोशे कफे चूडामणिस्तथा ॥ ज्वालामुखी
नखज्वाला अभेद्या सर्वसंधिषु ॥ ३३ ॥ शुक्रं ब्र

Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥४॥ श्रोणीमेरक्षेछायांछत्रेश्वरीतथा॥ अहंकारंम
नोबुद्धिंरक्षमेप्राणधारिणि॥२४॥ प्राणापानौ
तथाव्यानमुदानंचसमानकं॥ रसेरूपेचगंधेच
(2) शब्देस्पर्शेचयोगिनी॥२५॥ सत्वंरजस्तमश्चैव
रक्षेन्नारायणीतथा॥ आयुर्मेरक्षवाराहिधर्मंमे
रक्षवैष्णवि॥२६॥ [illegible]रक्षतुइंद्राणीयशोःकीर्तिं
बलंचमे॥ धृतिंस्मृतिंबलंलक्ष्मींचसदारक्षतुवैष्ण
वी॥२७॥ गोत्रमिंद्राणीमेरक्षेत्पशून्मेरक्ष
चंडिके॥ पुत्रान्रक्षेन्महालक्ष्मीर्भार्यारक्षतुभै
रवी॥२८॥ मार्गंक्षेमकरीरक्षेद्विजयासर्वतः
स्थिता॥ सर्वरक्षाकरंपुण्यंकवचंसर्वदाजपेत्॥ ॥४॥

...Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2A)

॥३९॥ इदं रहस्यं विदुषे भक्त्या तव मयोदितं ॥ रक्षा
हीनं तु यत्स्थानं वर्जितं कवचेन तु ॥४०॥ तत्सर्वं
रक्ष मे देवि दुर्गे दुर्गापहारिणि ॥ पदमेकं न गच्छेत्तु
यदिच्छेच्छुभमात्मनः ॥४१॥ कवचेनावृतो नित्यं
यत्र यत्रापि गच्छति ॥ तत्र तत्रार्थलाभश्च विजयः सा
र्वकामिकः ॥४२॥ यं यं चिंतयते कामं तं तं प्राप्नोति
निश्चितं ॥ परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥
॥४३॥ निर्भयो जायते मर्त्यस्त्रैलोक्येप्यपराजि
तः ॥ जीवेद्वर्षशतं साग्रं अपमृत्युविवर्जितः ॥
॥४४॥ नश्यंति व्याधयः सर्वे लूताविस्फोटकाद
यः ॥ स्थावरं जंगमं वापि कृत्रिमं चापि यद्विषं ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

॥५॥

(3)

॥४५॥ आभिचाराणिसर्वाणिमंत्रयंत्राणिभूतले॥
भूचराःखेचराश्चैवजलजाश्चोपदेशिकाः॥४६॥
सहजाःकुलजावामाशाकिनीडाकिनीतथा॥
अंतरिक्षचराघोराडाकिन्यश्चमहाबलाः॥४७॥
ग्रहभूतपिशाचाश्चयक्षगंधर्वराक्षसाः॥ ब्रह्म
राक्षसवेतालाःकूश्मांडाभैरवादयः॥४८॥ नश्यं
तिदर्शनात्तस्यकवचेहृदिसंस्थिते॥ मानोन्नति
र्भवेद्राज्ञस्तेजोवृद्धिकरंपरं॥४९॥ यशसावर्ध
तेसोपिकीर्तिमान्भूतलेखिले॥ जपेत्सप्तशतीं
चंडींकृत्वातुकवचंपुरा॥५०॥ यावद्भूमंडलंधत्ते
सशैलवनकाननं॥ तावत्तिष्ठतिमेदिन्यांसंततिः॥५१॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(3A)

पुत्रपौत्रिकी॥ ५१॥ देहांतेपरमंस्थानंयत्सुरैरपि
दुर्लभं॥ प्राप्नोतिपुरुषोनित्यंमहामायाप्रसाद
तः॥ ५२॥ ॥ इतिमार्कंडेयपुराणेदेवीमाहात्
म्येहरिहरविरंचितंसप्तशतीकवचंसमाप्तं॥
ॐ नमश्चंडिकायै॥ श्री॥ जयंतीमंगलाकाली
भद्रकालीकपालिनी॥ दुर्गाक्षमाशिवाधात्रीस्व
धास्वाहानमोस्तुते॥ १॥ मधुकैटभविद्राविवि
धातृवरदेनमः॥ रूपंदेहि०॥ २॥ महिषासुरनिर्नाशि
विधात्रिवरदेनमः॥ रूपंदेहि०॥ ३॥ रक्तबीजवधे
देविचंडमुंडविनाशिनि॥ रूपंदेहि०॥ ४॥ शुंभ

Sanshodhan Mandal, Dhule and the Yashwantrao ... Mumbai

॥ दी ॥ स्यैव निशुंभस्य धूम्राक्षस्य च मर्दिनि ॥ रूपं देहि०
॥ ५ ॥ वंदितांघ्रियुगे देवि देवि सौभाग्यदायिनि ॥
(५) रूपं देहि० ॥ ६ ॥ अचिंत्यरूपचरिते सर्वशत्रुविना
शिनि ॥ रूपं देहि० ॥ ७ ॥ नतेभ्यः सर्वदा भक्त्या
चंडिके दुरितापहे ॥ रूपं देहि० ॥ ८ ॥ स्तुवद्भ्यो
भक्तिपूर्वं त्वां चंडिके व्याधिनाशिनि ॥ रूपं देहि०
॥ ९ ॥ देवि भक्तजनोद्दामदत्तानंदोदयांबिके ॥
रूपं देहि० ॥ १० ॥ चंडिके सततं ये त्वामर्चयंतीह भ
क्तितः ॥ रूपं देहि० ॥ ११ ॥ देहि सौभाग्यमारोग्यं
देहि देवि परं सुखं ॥ रूपं देहि० ॥ १२ ॥ विधेहि देवि ॥ दी ॥

(५A)

कल्याणं विधेहि विपुलां श्रियं ॥ रूपं देहि० ॥१३॥
विधेहि द्विषतां नाशं विधेहि बलमुच्चकेः ॥ रूपं देहि०
॥१४॥ विद्यावंतं यशस्वंतं लक्ष्मीवंतं जनं कुरु ॥ रूपं
देहि० ॥१५॥ चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ॥
रूपं देहि० ॥१६॥ कृष्णेन संस्तुते देवि शश्वद्भक्त्या
त्वमंबिके ॥ रूपं देहि० ॥१७॥ हिमाचलसुतानाथ
संस्तुते परमेश्वरि ॥ रूपं देहि० ॥१८॥ इंद्राणीपति
सद्भावपूजिते परमेश्वरि ॥ रूपं देहि० ॥१९॥ सुरासु
रशिरोरत्ननिघृष्टचरणेंबिके ॥ रूपं देहि० ॥२०॥
देवि प्रचंडदोर्दंडदैत्यदर्पविनाशिनि ॥ रूपं देहि० ॥

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

७॥ ॥२१॥ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं ॥ ता
रिणीं दुर्गसंसारसागरस्य कुलोद्भवां ॥२२॥ इदं स्तो
(5) त्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥ स तु सप्तश
ती संख्यावरमाप्नोति संपदां ॥२३॥ इत्यर्गला
स्तुतिः ॥ ॐ नमः शिवाय ॥ ॥ विशुद्धज्ञानदेहा
य त्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्तिनिमित्ताय नमः
सोमार्धधारिणे ॥१॥ सर्वमेतद्विनायस्तु मंत्राणा
मभिकीलकं ॥ सोपि क्षेममवाप्नोति सततं जाप्य
तत्परः ॥२॥ सिध्यंत्युच्चाटनादीनि वस्तूनि सकला
न्यपि ॥ एतेन स्तुवतां देवीं स्तोत्रवृंदेन सिद्धिदां ॥३॥
न मंत्रो नौषधं तत्र न किंचिदपि विद्यते ॥ विना जा

(5A)

प्येन सिध्येत सर्वमुच्चाटनादिकं ॥४॥ समस्तान्य
पि सिध्यंति लोकशंकामिमां हरः॥ कृत्वा निमंत्रया
मास सर्वमेवमिदं शुभं ॥५॥ स्तोत्रं वै चंडिकायास्तु
यच्चगुह्यं चकार सः॥ समाप्तेयस्तु पुण्येन तां यथा
वन्निमंत्रणां ॥६॥ सोपि क्षेममवाप्नोति सर्वमेव
न संशयः॥ कृष्णायां वा चतुर्दश्यामष्टम्यां वा समा
हितः॥७॥ ददाति प्रतिगृह्णाति नान्यथैषा प्रसि
ध्यति॥ इत्थंरूपेण कीलेन महादेवेन कीलितं ॥८॥
यो निःकीलां विधायैनां नित्यं जपति संस्फुटं॥ स
सिद्धः सगणः सोपि गंधर्वो जायते वने॥९॥ न चै
वाप्यटतस्तस्य भयं क्वापीह जायते॥ नापमृत्यु

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

॥८॥ वशंयातिम्रतोमोक्षमवाप्नुयात् ॥१०॥ ज्ञात्वाप्रार
भ्यकुर्वीत अकुर्वाणो विनश्यति ॥ ततोज्ञात्वैवसं
पन्नमिदंप्रारभ्यतेबुधैः ॥११॥ सौभाग्यादिचय
त्किंचिद्दृश्यतेललनाजने ॥ तत्सर्वंतत्प्रसादेन तेन
(6) जाप्यमिदंचतत् ॥१२॥ शनैस्तुजप्यमानेस्मिन्स्तो
त्रेसंपत्तिरुच्चकैः ॥ भवत्येवसमग्रापि ततः प्रार
भ्यमेवतत् ॥१३॥ ऐश्वर्यंयत्प्रसादेन सौभाग्यारो
ग्यसंपदः ॥ शत्रुहानिःपरोमोक्षः स्तूयतेसान
किंजनैः ॥१४॥ ॥ इतिकिलकस्तोत्रंसंपूर्णं ॥
छ ॥ ॥ अथप्रथमचरित्रस्यब्रह्माऋषिः ॥
सप्तशतीस्तोत्रमालामंत्रस्यसनवार्णकस्यब्रह्म ॥८॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

विष्णुरुद्रा ऋषयः ॥ गायत्र्युष्णिगनुष्टुप् छंदांसि ॥
श्रीब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि । गायत्र्यु
ष्णिगनुष्टुप् छंदोभ्यो नमः मुखे ॥ महाकाली महा
लक्ष्मीर्महासरस्वती देवताभ्यो नमः हृदये ॥ रक्तदंति
का दुर्गा भ्रामरी बीजेभ्यो नमः गुह्ये ॥ नंदा शाकंभरी
भीमाः शक्तिभ्यो नमः पादयोः ॥ अग्निवायुसूर्यास्त
त्त्वेभ्यो नमः व्यापकं ॥ खड्गिनी शू० शंखिनी चा० १
धूम्रवर्णायै महाकाल्यै नमः ॥ सर्वांगि व्यापकं ॥ शू
लेन पाहि नो० घंटा० प्रा० च्यां० भ्रामणे० सौम्या० यो
नि चा० खड्गशूलग० करप० ॥ ४ ॥ रक्तचित्रवर्णायै
महालक्ष्म्यै नमः ॥ व्यापकं० ॥ सर्वस्व० भयेभ्य०

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

॥९॥ एतत्ते० पातुन० ज्वालाक० त्रिमूलंपातु० हिनास्ति०
साघं० असुरास्र० शुभायरव० ५ शुक्लचर्णो येस महा
सरस्वत्यैनमः॥ सर्वंगिव्यापकंकृत्वा जातवेदसे
मंत्रंपठेत्॥२८॥८॥ ओं ऐं श्रीं ह्रीं क्लीं चामुंडायेवि
च्चे॥ इति आदावंते च शतं शतं जपेत्॥ मध्यमच
रितस्य विष्णुर्ऋषिः उष्णिक् छंदः महालक्ष्मीर्देवता:
शाकंभरी शक्तिः दुर्गा बीजं वायुस्तत्वं महालक्ष्मी
प्रीत्यर्थे जपे विनियोगः॥ श्री॥ महाकाली महा
लक्ष्मी महासरस्वत्यो देवताः॥ रक्तदंतिका दुर्गाख्या
मयो बीजानि॥ नंदा शाकंभरी भीमाः शक्तयः॥ अ
ग्नि वायु सूर्यास्तत्वानि॥ महाकाली महालक्ष्मी ॥९॥

(७)

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project "

(७A)

महासरस्वतीप्रीत्यर्थंजपेविनियोगः॥ ॥ऋ
ष्यादिभिर्न्यासंकृत्वानवार्णमंत्रंजप्त्वास्तोत्रंजपेत्॥
॥ ॥मार्कंडेयउवाच॥ सावर्णिःसूर्यतनयो
योमनुःकथ्यतेष्टमः॥ निशामयतदुत्पत्तिंविस्तरा
द्गदतोमम॥१॥ महामायानुभावेनयथामन्वंतरा
धिपः॥सबभूवमहाभागःसावर्णिस्तनयोरवेः॥
॥२॥स्वारोचिषेंतरेपूर्वंचैत्रवंशसमुद्भवः॥सुरथो
नामराजाभूत्समस्तेक्षितिमंडले॥३॥तस्यपाल
यतःसम्यक्प्रजाःपुत्रानिवौरसान्॥बभूवुःशत्र
वोभूपाःकोलाविध्वंसिनस्तदा॥४॥तस्यतैरभव
द्युद्धमतिप्रबलदंडिनः॥न्यूनैरपिसतैर्युद्धेकोला

Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

॥१०॥ विध्वंसिभिर्जितः॥५॥ततःस्वपुरमायातो निजदेशा
धिपोभवत्॥आक्रांतःसमहाभागस्तैस्तदाप्रबला
रिभिः॥६॥अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः।
कोशोबलंचापहृतंतत्रापिस्वपुरेततः॥७॥ततोमृ
(8) गयाव्याजेनहृतस्वाम्यःसभूपतिः॥एकाकीहय
मारुह्यजगामगहनंवनं॥८॥सतत्राश्रममद्राक्षी
द्द्विजवर्यस्यमेधसः॥प्रशांतश्वापदाकीर्णमुनिशि
ष्योपशोभितं॥९॥तस्थौकंचित्सकालंचमुनिना
तेनसत्कृतः॥इतश्चेतश्चविचरंस्तस्मिन्मुनिवराश्र
मे॥१०॥सोचिंतयत्तदातत्रममत्वाकृष्टमानसः॥ ॥१०॥
मत्पूर्वैःपालितंपूर्वंमयाहीनंपुरंहितत्॥११॥
१२

(8A)

मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतःपाल्यतेनवा॥नजानेसप्रधानो
मेशूरोहस्तीसदामदः॥१२॥ममवैरिवशंयातःका
न्भोगानुपलप्स्यते॥येममानुगतानित्यंप्रसादधनभो
जनैः॥१३॥अनुवृत्तिंध्रुवंतेद्यकुर्वंत्यन्यमहीभृतां॥
असम्यग्व्ययशीलैस्तैःकुर्वद्भिःसततंव्ययं॥१४॥
संचितःसोतिदुःखेनक्षयंकोशोगमिष्यति॥एतच्चा
न्यच्चसततंचिंतयामासपार्थिवः॥१५॥तत्रविप्राश्र
माभ्याशेवैश्यमेकंददर्शसः॥सपृष्टस्तेनकस्त्वंभो
हेतुश्चागमनेत्रकः॥१६॥सशोकइवकस्मात्वंदुर्म
नाइवलक्ष्यसे॥इत्याकर्ण्यवचस्तस्यभूपतेःप्रण
योदितं॥१७॥प्रत्युवाचसतंवैश्यःप्रश्रयावनतो

॥११॥ नृपंप्र वैश्यउवाच॥२०॥समाधिर्नामवैश्योहमुत्प
न्नोधनिनांकुले॥१८॥पुत्रदारैर्निरस्तश्चधनलोभा
दसाधुभिः॥विहीनःस्वजनैर्दारैःपुत्रैरादायमेधनं॥
॥१९॥वनमभ्यागतोदुःखीनिरस्तश्चाप्तबंधुभिः॥
(१) साहंनवेद्मिपुत्राणांकुशलाकुशलात्मिकां॥२०॥
प्रवृत्तिंस्वजनानांचदाराणांचात्रसंस्थितः॥किंनु
तेषांगृहेक्षेममक्षेमंकिंनुसांप्रतं॥२१॥कथंतेकिं
नुसद्वृत्तादुर्वृत्ताःकिंनुमेसुताः॥०॥२५॥राजोवा
च॥०॥२६॥यैर्निरस्तोभवाल्लुब्धैःपुत्रदारादिभिर्ध
नैः॥२२॥तेषुकिंभवतःस्नेहमनुबध्नातिमानसं॥०॥२८
॥वैश्यउवाच॥०॥२९॥एवमेतद्यथाप्राहभवा ॥११॥

Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

३०

(9A)

नस्मद्गतं वचः॥२३॥ किंकरोमि न बध्नाति मम निष्ठु
रतां मनः॥ यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निरा
कृतः॥२४॥ पतिस्वजनहार्दं च हार्दित्तेष्वेव मे म
नः॥ किमेतन्नाभिजानामि जानन्नपि महामते॥
॥२५॥ यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधुषु॥ तेषां
कृते मे निश्वासो दौर्मनस्यं च जायते॥२६॥ करोमि
किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरं॥०॥ मार्कंडेय उवा
च॥०॥ ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ॥
२७॥ समाधिर्नाम वैश्योसौ स च पार्थिवसत्तमः॥
कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदं॥२८॥उ
पविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ॥२९॥

॥१२॥ ॥ राजोवाच ॥ ॥ भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं व
दस्व तत् ॥ ३९ ॥ दुःखाय यन्मे मनसः स्वचित्तायत्त
तां विना ॥ ममत्वं गतराज्यस्य राज्यांगेष्वखिलेष्व
पि ॥ ४० ॥ जानतो पि यथाज्ञस्य किमेतन्मुनिसत्तम ॥
अयं च निःकृतः पुत्रैर्दारैर्भृत्यैस्तथोझितः ॥ ४१ ॥
स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ॥ एवमेष
तथाहं च द्वावप्यत्यंतदुःखितौ ॥ ४२ ॥ दृष्टदोषेपि
विषये ममत्वाकृष्टमानसौ ॥ तत्किमेतन्महाभा
ग यन्मोहो ज्ञानिनोरपि ॥ ४३ ॥ ममास्य च भवत्ये
षा विवेकांधस्य मूढता ॥ ० ॥ ऋषिरुवाच ॥ ० ॥ छ
ज्ञानमस्ति समस्तस्य जंतोर्विषयगोचरे ॥ ४४ ॥ ॥१२॥

(10A)

विषयाश्च महाभाग यांति चैवं पृथक् पृथक् ॥ दिवां
धाः प्राणिनः केचिद्रात्रावंधास्तथापरे ॥२५॥ केचि
द्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥ ज्ञानिनो म
नुजाः सत्यं किंतु तेन हि केवलं ॥२६॥ यतो हि ज्ञा
निनः सर्वे पशुपक्षिमृगादयः ॥ ज्ञानं च तन्मनुष्या
णां यत्तेषां मृगपक्षिणां ॥२७॥ मनुष्याणां च यत्ते
षां तुल्यमन्यत्तथोभयोः ॥ ज्ञानेपि सति पश्यैतान्प
तंगाञ्छावचंचुषु ॥२८॥ कणमोक्षादृतान्मोहात्पी
ड्यमानानपि क्षुधा ॥ मानुषा मनुजव्याघ्र साभि
लाषाः सुतान्प्रति ॥२९॥ लोभात्प्रत्युपकाराय
नन्वेते किं न पश्यसि ॥ तथापि ममतावर्त्ते मोहगर्त्ते

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com